पढ़े चलो, बढ़े चलो

RASHTRIYA MADHYAMIK SHIKSHA ABHIYAN

# प्रश्न बैंक 2021—22

## कक्षा 10 वीं

## संस्कृत व्याकरणम्

## विषयकोड - 1001

महर्षि पतंजलि संस्कृत संस्थान
म॰ प्र॰ भोपाल

महर्षि-पतंजलि-संस्कृत-संस्थानम्

पूर्वमध्यमा (10वीं) परीक्षा सत्र 2021-22

ब्लू प्रिंट BLUE PRINT OF QUESTION PAPER

विषय- संस्कृत-व्याकरणम्

विषयकोड - 1001

| सं. क्र. | इकाई एवं विषयवस्तु | इकाई पर आवंटित अंक | वस्तुनिष्ठ प्रश्न/अंक | अंकवार प्रश्नों की संख्या / अङ्कानुसारेण प्रश्नानां संख्या | | | | कुल प्रश्न |
|---|---|---|---|---|---|---|---|---|
| | | | अंक 1 | अंक 2 | अंक 3 | अंक 4 | अंक 5 | |
| 1 | हलन्तपुंलिङ्गशब्दाः | 7+7 | 14 | – | – | – | – | 02 |
| 2 | हलन्तस्त्रीलिङ्गशब्दाः | 06 | 06 | – | – | – | – | 01 |
| 3 | हलन्तनपुंसकलिङ्गशब्दाः | 06 | 06 | – | – | – | – | 01 |
| 4 | अव्ययप्रकरणम् | 06 | 06 | – | – | – | – | 01 |
| 5 | परस्मैपदीधातवः | 19 | – | 03 | 03 | 01 | – | 07 |
| 6 | (i) आत्मनेपदीधातवः | 19 | – | 05 | 03 | – | – | 08 |
| | (ii) उभयपदीधातवः | | | 01 | | 02 | – | [illegible] |
| 7 | संस्कृते अनुवादः | 10 | | 01 | | 02 | – | [illegible] |
| 8 | हिन्द्यां अनुवादः | 10 | | | | | 01 | [illegible] |
| 9 | अनुच्छेदलेखनम् | 05 | | | | | 01 | [illegible] |
| 10 | अनुच्छेदपूर्तिः | 05 | | | | | | |
| | योगः | 100 | 32 | 20 | 18 | 20 | 10 | 28 |

इकाई और विषयवस्तु का स्पष्टीकरण—

* प्रश्न क्रमांक 1 से 5 तक 32 वस्तुनिष्ठ प्रश्न होंगे। इकाई 1 हलन्तपुंलिङ्ग-प्रकरणम् से दो प्रश्न 'सही विकल्प' 07 अंक के 07 अङ्क तथा 'एकवाक्येन उत्तरं ददत' 07 अंक के होंगे।

* इकाई क्रमांक 02 हलन्त स्त्रीलिङ्गशब्दाः से 06 अङ्क का 01 प्रश्न 'रिक्तस्थानानि पूरयत' प्रश्न होगा,

VIJAYSHRI
PAGE NO.:
DATE:

प्रश्नः-1- उचित-विकल्पं चित्वा लिखत ।

(01) हकारस्य ढकारादेशः केन सूत्रेण भवति ।
(i) संप्रसारणाच्च (ii) दादेर्धातोर्घः (iii) हो ढः (iv) सावनडुहः

(02) संप्रसारणवर्णः नास्ति ।
(i) इ (ii) उ (iii) ऋ (iv) क

(03) रषाभ्यां नो णः समानपदे इति सूत्रेण भवति ।
(i) षत्वविधानम् (ii) णत्वविधानम् (iii) कुत्वविधानम् (iv) कोऽपिन

(04) चतुर्णाम् इति पदे णकारस्य द्वित्वं केन सूत्रेण भवति ।
(i) मो नो धातोः (ii) शेः सुपि
(iii) अचो रहाभ्यां द्वे (iv) शरोऽचि

(05) 'इदम्' शब्दस्य पुंलिङ्गे प्रथमा एकवचनं किम् ?
(i) इयम् (ii) इमौ (iii) अयम् (iv) कोऽपि न

(06) पञ्चन् शब्दो नित्यं भवति ।
(i) एकवचने (ii) बहुवचने (iii) द्विवचने (iv) अनेकवचने

(07) चोः कुः इति सूत्रेण किम् भवति ।
(i) चवर्गस्य कवर्गः (ii) टवर्गस्य तवर्गः
(iii) पवर्गस्य टवर्गः (iv) कवर्गस्य चवर्गः

(08) 'युष्मद्' शब्दस्य सप्तमीबहुवचने शब्दरूपोऽस्ति ।
(i) अस्मासु (ii) युष्मासु (iii) युवयोः (iv) आवयोः

(09) अदस् शब्दस्य पञ्चमीविभक्तिः एकवचने पुंलिङ्गे शब्दरूपमस्ति —
(i) अमुयोः (ii) अमुष्य (iii) अमुष्मात् (iv) अमीभ्याम्

(10) राजन् शब्दस्य तृतीय एकवचने रूपं भवति।
(i) राज्ञि (ii) राजन् (iii) राज्ञा ✓ राजसु

(11) 'सुखं वां नौ ददात्वीशः' वाक्येऽस्मिन् युष्मद्-अस्मद् पदमस्ति।
(i) सुखम् (ii) ददातु (iii) ईशः (iv) वां नौ

(12) विशौ शब्दस्य मूलशब्दः (प्रातिपदिकशब्दः) अस्ति।
(i) विश् (ii) विट्/विड् (iii) विच् (iv) कोऽपि न

(13) 'पुमान्' शब्दस्य सप्तमीबहुवचनं रूपमस्ति।
(i) पुंसः (ii) पुमांसौ (iii) पुंभ्याम् (iv) पुंसु

(14) 'षण्णाम्' शब्दरूपः कस्यां विभक्त्यां वर्तते।
(i) प्रथमा (ii) द्वितीया (iii) तृतीया (iv) षष्ठी

प्रश्नः एकपदेन उत्तरं ददत।

(15) 'वेरपृक्तस्य' इति सूत्रेण लोपो भवति।

(16) 'सेर्हः साडः सः' इति सूत्रेण किमादेशो भवति।

(17) 'अतो गुणे' कस्य गुणे पररूपमेकादेशः स्यात्।

(17)

18 - 'पञ्च' शब्दस्य (षष्ठीविभक्त्यां) पुंलिङ्ग रूपाणि लिखत

19 - 'अष्ट' शब्दस्य (द्वितीया विभक्त्यां) शब्दरूपाणि लिखत।

20 - 'षट्' शब्दस्य (तृतीयाविभक्त्यां) रूपाणि लिखत।

21 - 'अदस्' शब्दस्य द्वितीयाविभक्त्यां पुंलिङ्गे रूपाणि लिखत

22 - 'युष्मद्' शब्दस्य तृतीया-एकवचनं लिखत

23 - अस्मद् शब्दस्य षष्ठी बहुवचनं लिखत

24 - 'लिट्त्सु / लिट्सु' इत्यस्मिन् पदे वचनमस्ति।

25 - 'अनेन' इत्यस्मिन् पदे विभक्तिः अस्ति।

26 - 'देवट्' शब्दस्य प्रथमैकवचनमस्ति।

27 - 'तत्' शब्दस्य पुंलिङ्गे पञ्चमी-एकवचनं लिखत

28 - 'एतत्' शब्दस्य चतुर्थी बहुवचनं लिखत।

प्रश्नः रिक्तस्थानानि पूरयत —

29 अप् शब्दो नित्यं भवति ..... । (बहुवचनान्तः / एकवचनान्तः)

30 'दिवे' इत्यस्मिन पदे विभक्तिः अस्ति --- । (पञ्चमी / चतुर्थी)

— 03 —

31 गिर् शब्दस्य द्वितीयाविभक्तेः एकवचने रूपमस्ति ---।
(गिरौ / गिरम्)

32 कस्याम् - कासु पदयोः विभक्तिः अस्ति ----।
(षष्ठी / सप्तमी)

33 "वाचा - वाग्भ्याम् - वाग्भिः" रूपाणि सन्ति ---।
(प्रथमा विभक्तिः / तृतीया विभक्तिः)

34 "यः सौ" इति सूत्रेण किमादेशः ----।
(इदमो दस्य यः / इदमो दस्य सः)

35 "एषा - एते - एताः" एतस्याः प्रातिपदिकमस्ति ---।
(एतद् / तद्)

36 "असौ - अमू - अमूः" एतस्याः प्रातिपदिकमस्ति ----।
(तदस् / अदस्)

37 "शिशि" शब्दरूपे वचनमस्ति -----।
(एकवचनं / बहुवचनम्)

38 त्यस्यै - त्याभ्याम् - त्याभिः - पदानां मूलपदं (प्रातिपदिकं) किम् अस्ति -------। (तद् / त्यद्)

39 "सजुष्" प्रातिपदिकस्य प्रथमा-एकवचने रूपमस्ति -----।
(सजुषा / सजूः)

40 आशीः - आशिषौ - आशिषः कस्याः विभक्तेः रूपाणि सन्ति — (द्वितीया / प्रथमा)

प्रश्नः शब्दरूपाणि / संज्ञापदस्य युग्मेलनम् कुरुत -

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| 41 = | किम् | दण्डीभि |
| 42 | अस्मै | कानि |
| 43 | दण्डि | एभ्यः |
| 44 | तत | पयांसि |
| 45 | येन | तानि |
| 46 | पयः | यैः |
| 47 | अमुना | एतानि |
| 48 | धनुः | अमीभिः |
| 49 | एतत् | धनूंषि |
| 50 | हविः | शकृन्ति |
| 51 | तुदत् | हवींषि |
| 52 | शकृत | तुदन्ति |

प्रश्नः शुद्धवाक्यानाँ समक्षे 'आम्' अशुद्ध वाक्यानाँ समक्षे 'न' इति लिखत ।

53 अव्ययीभावश्च उदाहरणं अधिहरि ।
54 स्वधा-स्वस्ति-अलं-वषटादि योगे चतुर्थी भवति ।
55 विना-नाना अव्ययप्रयोगे सप्तमीविभक्तिः भवति ।
56 'कृन्मेजन्तः' सूत्रस्य-उदाहरणमस्ति-स्मारं-स्मारम् ।
57 सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु...तदव्ययम् ।
58 समया / निकषा अव्ययप्रयोगः निकटार्थे भवति ।
59 अन्तरा - अन्तरेण वा प्रयोगः दूरार्थे भवति ।
60 साकम् - सार्धम् अव्ययप्रयोगे तृतीयाविभक्तिः भवति ।
61 भूयस् अव्ययः पुनरर्थे आधिक्ये च भवति ।
62 सु पूजायाम् न भवति ।
63 संवत वर्षे अर्थे भवति ।
64 साक्षात प्रत्यक्षे भवति । (20)

VIJAYSHRI PAGE NO.: DATE:

प्रश्नः) अतिलघु-उत्तरीय प्रश्नानि —

65= 'लः परस्मैपदम्' इति सूत्रेण का संज्ञा भवति।
66= 'भवन्ति' धातुरूपाणि कस्मिन् वचने अस्ति।
67= 'अभ्याससंज्ञा' केन सूत्रेण भवति।
68= 'कर्तरि शप्' सूत्रेण किम् भवति।
69= 'भवामि' धातुपदे कः पुरुषः अस्ति
70= लृट् लकारः कस्मिन् काले भवति।
71= विध्याद्यर्थेषु धातुं कः लकारः भवति।
72= 'भवन्तु' पदे लकारः अस्ति।
73= 'लोपो व्योर्वलि' सूत्रेण किम् लोपो भवति।
74= 'गच्छति' पदे धातुः अस्ति
75= 'एधध्वे' पदे वचनमस्ति।
76= कामयते इत्यस्मिन् पदे धातुः अस्ति।
77= वर्तन्ते इत्यस्मिन् पदे पुरुषः अस्ति।
78= 'हृञ् हरणे' इति धातोः रूपाणि लट् लकारे प्रथमपुरुषे त्रिषुवचनेषु लिखत
79⇒ काँऽपि द्वे उभयपदिनः धातू लिखत्।
80⇒ 'ढो ढे लोपः' इति सूत्रेण कस्य लोपो भवति।
81⇒ 'वहति/वहते' पदेऽस्मिन् धातुः अस्ति।
82⇒ 'यज्' धातोः लट् लकारे म॰पु॰ त्रिषुवचनेषु रूपाणि लिखत
83⇒ 'भज सेवायाम्' धातोः लृट् लकारे प्रथमपुरुषे परस्मैपदी रूपाणि त्रिषु वचनेषु लिखत
84⇒ 'धरति/धरते' इत्यस्मिन् पदे धातू लिखत।
85⇒ 'इजादेश्च गुरुमतोऽनृच्छः' सूत्रेऽस्मिन् 'इच्' प्रत्याहारस्य वर्णाः लिखन्तु।
86⇒ 'सवाभ्यां वामौ' इति सूत्रेण किम् भवति।

(9) —— 06 ——

VIJAYSHRI
PAGE NO.:
DATE:

87= पचति, नयति, हरति, धरति इति धातुपदानां
88= हिन्द्यां अर्थाः लिखत।

88= तप् संतापे, पा पाने च धातवो लट्लकारे प्रथमपुरुषे त्रिषुवचनेषु रूपाणि लिखत।

हिन्द्यां संस्कृते अनुवादं करोति

89 राम जाता है।
90 बालिका पढ़ती है।
91 आकाश सोचता है।

संस्कृतेन हिन्द्यां अनुवादं करोति।

92 मया सेवते।
93 माता भोजनं पचति।
94 सत्सङ्गति दुर्गुणान् हरति।

लघुत्तरीय प्रश्नाः

95 = 'भवति' इति धातुरूपं सिद्ध्यति।
96 = 'भविष्यतः' इति धातुः पदं सूत्रेण सिद्ध्यति।
97 = 'रुरुः' मोर्निः सूत्रद्वयं व्याख्येयः।
98 = 'श्रुवः शृ च' सूत्रेण शृणोति रूपं सिद्ध्यत।
99 = 'इषुगमियमां छः' सूत्रेण गम् धातोः छिं भवति।
100 = 'गच्छति' पदं सूत्राधारेण सिद्ध्यतु।
101 = श्लोकाधारेण वेट् – सेट् धातवः परिचयं लिखत –
अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयम्।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड्भवेत्।

102 ⇒ 'लोटि च' सूत्रानुसारेण भू/भव धातोः रूपाणि लिखत
103 ⇒ भू/भव धातोः लङ्लकारे त्रिषु वचनेषु पुरुषेषु च रूपाणि लिखत
104 ⇒ लट् लकारे "रुध्" धातोः रूपाणि लिखत
105 ⇒ "रुध्यते" धातुरूपसूत्रानुसारं सिद्ध्यति।
106 ⇒ 'वृत्' धातुरूपाणि लोटलकारे त्रिषु पुरुषेषु वचनेषु च लिखत।
107 ⇒ "रुच्" इति धातुरूपाणि लट्लकारे त्रिषु वचन-पुरुषेषु च लिखत।
108 ⇒ धृञ् धारणे इति धातुपदस्य रूपाणि लङ्लकारे त्रिषु वचन-पुरुषेषु च लिखत।
109 ⇒ यज् परस्मैपदिधातोः रूपाणि विधिलिङ्लकारे त्रिषु पुरुष-वचनेषु च लिखत।
110 ⇒ भज् सेवायां इति धातोः रूपाणि आत्मनेपदे लट्लकारे त्रिषु पुरुष-वचनेषु लिखत।
111 ⇒ 'वह प्रापणे' इति धातोः रूपाणि निर्देशानुसारं लिखत - लोटलकारे मध्यमपुरुषे - त्रिषुवचनेषु
112 ⇒ 'णीञ् (नी) हरणे' इति धातोः रूपाणि प्रथमपुरुषे लट्लकारे परस्मैपद-आत्मनेपदयोः लिखत।

दीर्घोत्तरीय प्रश्नाः

113 ⇒ लोटलकारे पठ् धातोः त्रिषु पुरुषेषु वचनेषु च रूपाणि लिखत।
114 ⇒ भू धातोः लृट्लकारे त्रिषुवचन-पुरुषयोः रूपाणि लिखत

(23)

VIJAYSHRI
PAGE NO.:
DATE:

115 ⇒ लोट् लकारे रुध् धातोः (आत्मनेपदिनः) त्रिषु वचन-पुरुषयोः रूपाणि लिखत ।

116 ⇒ 'टित आत्मनेपदानां टेरे' सूत्रेण रुध् धातोः पदं सिद्ध्यति ।

117 ⇒ पच् धातोः (उभयपदिनः) लङ्लकारे त्रिषु पुरुष-वचनयोः रूपाणि लिखत -

118 वाक्यानां संस्कृते अनुवादः कुरुत -
(i) बालक पढ़ता है ।
(ii) बालिका खेलती है ।
(iii) राम धीरे-धीरे जाता है ।
(iv) सुशीला हँसती है ।
(v) तुम संस्कृत पढ़ते हो ।
(vi) बन्दर दौड़ते हैं ।

लोट् लकारे अनुवादः कुरुत
119 ⇒ (i) पुस्तक पढ़ो ।
(ii) पत्र लिखो ।
(iii) तुम मन्दिर को देखो ।
(iv) बालिका भोजन पकाओ ।
(v) यश प्राप्त करो ।
(vi) मैं वेद पढ़ूँ ।

120 ⇒ विधिलिङ्लकारे वाक्यानां रचना संस्कृते कुरुत -
(i) वह घर आना चाहिए ।
(ii) उसको सत्य बोलना चाहिए ।
(iii) बादल जल बरसाएँ ।
(iv) वह सुखी होवे ।
(v) बालक ज्ञानी होना चाहिए ।
(vi) देश उन्नत होना चाहिए ।

पृष्ठ → 09 (25)

121 ⇒ लङ् लकारे वाक्यानां अनुवादः कुरुत -
(i) जंगल में शेर रहता था।
(ii) बालक विद्यालय गया।
(iii) छात्र ने गणित पढ़ा।
(iv) छात्रों ने निबन्ध लिखा।
(v) अध्यापक ने पाठ पढ़ाया।
(vi) कविता ने गीत गाया।

122 ⇒ लृट् लकारे वाक्यानां अनुवादरचनां कुरुत -
(i) छात्र विद्यालय आयेंगे।
(ii) हम मेला देखेंगे।
(iii) शिक्षक कहानी पढ़ायेंगे।
(iv) सिपाही देश रक्षा करेंगे।
(v) छात्र कबड्डी खेलेंगे।
(vi) पुत्र माता की सेवा करेगा।

गद्यांशाधारितं हिन्दीगद्यखण्डानां संस्कृते अनुवादः कुरुत —

123 ⇒ मैं संस्कृत पढ़ता हूँ। संस्कृत भारतीय भाषाओं की जननी है। इसका शब्द भण्डार भर-पूर है। इसमें व्याकरण की शुद्धता है। हमें संस्कृत अवश्य पढ़ना चाहिए।

124 ⇒ हमारा देश भारत है। इसकी राजधानी दिल्लीनगर है। यहाँ गंगा यमुना गोदावरी आदि नदियाँ बहती है। हमारा राष्ट्रध्वज त्रिवर्णात्मक है। देश सेवा ही हमारा परमधर्म है।

125= सज्जनों के आचार को सदाचार कहते हैं। सज्जन सदा दूसरों का उपकार करते हैं। शिष्टाचार का पालन करते हैं। मधुर वचन बोलते हैं। प्रकृति भी परोपकार की शिक्षा देती है। वृक्ष परोपकार के लिये फल देते हैं। नदियाँ परोपकार के लिए वहति हैं। अतः परोपकार ही परमधर्म है।

126= प्राचीन शास्त्रों में जीवन को चार भागों में बाँटा गया है :- ब्रह्मचर्य, गृहस्थ, वानप्रस्थ और संन्यास। प्रथम आश्रम ब्रह्मचर्य है, यही विद्यार्थि जीवन का काल है। विद्यार्थि जीवन की आधार शिला है।

127= महाकवि कालिदास संस्कृत साहित्य के सर्वश्रेष्ठ कवि है। उनकी तुलना जर्मन कवि शेक्सपीयर से की जाती है। यह महान कवि और नाटककार थे। कालिदास के द्वारा विरचित सात ग्रन्थ है। दो महाकाव्य, दो खण्डकाव्य और तीन नाटक है। यह भारत में कविकुलगुरुः की उपाधि से विभूषित थे।

श्लोकानां हिन्द्यां अनुवादं कुरुत

128→ हंसः श्वेतः बकः श्वेतः को भेदो बकहंसयोः।
नीरक्षीरविभागे तु हंसो हंसः बको बकः॥

129 ⇒ काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥

130 ⇒ एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैव दशभिः पुत्रैः भारं वहति रासभी ॥

131 ⇒ पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः ॥

132 ⇒ संपत्तौ च विपत्तौ च महतामेकरूपता ।
उदये सविता रक्तो रक्तश्चास्तमये तथा ।

गद्यखण्डानां हिन्दीभाषायां अनुवादं कुरुत —

133 ⇒ क्रोधः मनुष्यस्य प्रधानः वैरी अस्ति ।
अस्माकं शास्त्रेषु वर्णितं यत् क्रोधः सुदुर्जयः
शत्रुः इति । समाजे एतादृशाः विरलाः एव
जनाः भवन्ति, ये क्रोधं न कुर्वन्ति ।
क्रोधी मनुष्यः सदा कष्टम् अनुभवति ।

134 ⇒ संसारे जनाः सुखम् इच्छन्ति । सुखं च धनेन एव
प्राप्तुं शक्यते । अतः धनोपार्जनस्य आवश्यकता
भवति यस्य पार्श्वे धनं भवति सः सुखेन शेते । निर्धनं
पुरुषं तु मित्राणि अपि त्यजन्ति । चौर्येण, कपटेन,

च प्राप्तं धनं विनाशकरं भवति। कृषिकर्मणा, व्यापारेण परिश्रमेण च प्राप्तं धनं फलानि। यद् धनं फलति तेनैव सुखं प्राप्यते। धनहीनोऽपि सुखी भवति। सुखं तु मनसा अनुभूयते। यत्र संतोषः, तत्रैव वस्तुतः सुखम्।

135 ⇒ विद्यार्थिजीवनं पूर्णतः अनुशासनबद्धं भवति। विद्यार्थिजीवने एव समस्तानां मानवोचितगुणानां विकासो भवति। छात्र एव राष्ट्रस्यानुपमा निधिरस्ति। अतः छात्राणां शारीरिकं चारित्रिकं च विकासं अत्यन्तावनिवार्यम्। विद्यार्थिजीवनमेव सम्पूर्णागामिजीवनस्य आधारशिला। अतः तेषां सम्यक् रक्षणं, पोषणम् च कर्तव्यम्।

136 ⇒ सताम् आचारः सदाचारः इत्युच्यते। सज्जनाः विद्वांसो यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टाचारपूर्वकं व्यवहारं कुर्वन्ति। ते सत्यं वदन्ति, मातुः पितुः गुरुजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति, तेषाम् आज्ञां पालयन्ति सत्कर्मणि प्रवृत्ता भवन्ति।

137 ⇒ विद्या सर्वेषु धनेषु श्रेष्ठमस्ति, यतोहि विद्यैव व्यये कृते वर्धते। अन्यद् धनं व्यये कृते क्षयं प्राप्नोति। विद्यया जगति मनुष्यः उन्नतिं करोति। विद्या दुःखेषु विपत्तिषु च नरस्य रक्षां करोति। विद्यैव कीर्तिं धनं च ददाति।

VIJAYSHRI
PAGE NO.:
DATE:

# || चित्रवर्णनम् ||

5.

विशेष



प्रश्नः-138 उपरिदत्तं चित्रं दृष्ट्वा मञ्जूषातः पदानि अवचित्य रिक्तस्थानानि पूरयन्तु—

1. अस्मिन् चित्रे एकः ............... परिवारः वर्णितः।
2. ............... पुस्तकानि सन्ति।
3. प्रकोष्ठे मंचस्य ............... समाचारपत्रम् अस्ति।
4. एका बालिका स्वपुस्तकानि ............... स्थापयति।
5. माता स्वसन्ततिं कार्यरतां दृष्ट्वा ............... ।

| मञ्जूषा—आदर्शः, पितुः, चरणस्पर्शम्, प्रसीदति, दत्तचित्तः, कापाटिकायाम्, उपरि। |
|---|

प्रश्नः = 139

अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि रचयत ।

(मञ्जूषा - विद्यालयः, ध्वजः, वृक्षाः, छात्राः, पादकन्दुकम्, तिस्रः, एकः, बद्दलः, कूर्दन्ति, द्वौ)





प्रश्न — 14 —

प्रश्नः 140 = अधोलिखितान् शब्दान् नीत्वा चित्रस्य वर्णनं पञ्चवाक्येषु कुरुत -

(मञ्जूषा-मानचित्रम्, कक्षायाः चित्रम्, परिचारकः, छात्रम्, अध्यापिका, छात्राः, पश्यन्ति, प्रकोष्ठे, काष्ठफलकम्, ध्यानेन)



प्रश्नः 141 मञ्जूषायाः शब्दान् नीत्वा चित्रस्य वर्णनं पंचवाक्येषु कुरुत -

(मञ्जूषा - उपवनस्य, जनाः, भ्रमणम्, वृक्षाः, पादपः, कुर्वन्ति, सरोवरः, कमलानि, वातावरणम्, उपतिष्ठति)



प्रश्नः - 142 मञ्जूषायाः शब्दान् नीत्वा चित्रस्य वर्णनं पंचवाक्येषु कुरुत -

(मञ्जूषा - पर्वताः, गृहाणि, पर्वतीय, सूर्यः, उदयति, ग्रामस्य, ग्रामीणाः, जनाः, सामान्याः, वृक्षाः)



(30)

[redacted]

# अनुच्छेदलेखनम् ( निबंध )

प्रश्नः- 143

## 1. छात्रजीवनम् ( विद्यार्थी जीवनम् )

यावत् कालो विद्याध्ययने याति तावत् विद्यार्थिनः जीवनः छात्रजीवनं उच्यते। छात्र जीवने छात्राः विद्यायाः अध्ययनं कुर्वन्ति। यावत् विद्यां अधीयन्ते तावद् भवति छात्रकालः। छात्राः नियम पूर्वकं स्वाध्यायं कुर्वन्ति। छात्रजीवनं सर्वथा: चिन्तारहितं भवति। एवं छात्रजीवने जीवनस्य निर्माणोभवति। छात्रजीवने छात्राः विद्यालयं गत्वा गुरोः सकाशात् विद्यां प्राप्तनुवन्ति। छात्राः विद्यालयेषु अध्ययनेन सह अन्यमपि ज्ञानवर्धकं क्रियाकलापं कुर्वन्ति। छात्राः अस्मिन् जीवने अनेकान् श्रेष्ठ गुणान् प्राप्तुम् यतन्ते। छात्र जीवने ये अनुशासनस्य नियमान् पालयन्तः अध्ययनं कुर्वन्ति तेषां भविष्यं उज्जवलं भवति। मानव जीवने अन्यकालापेक्षया अस्य कालस्य माहात्म्यं सर्वाधिकं वर्तते। जीवनस्य सफलता असफलता वा अस्यैव कालस्य उपरि निर्भरा भवति। अस्मिन्नैव समये भाविजीवनस्य कृते शक्तिव्ययः क्रियते। अतः छात्रजीवनं सर्वथा मनोरमं श्रेयस्करं च भवति।

प्रश्नः- 144

## 2. अस्माकं विद्यालयः ( मम पाठशाला )

मम विद्यालयस्य नाम होलीक्रास उ. मा. विद्यालयः अस्ति। मम विद्यालयः रायपुरं नगरस्य पेन्शनबाड़ायां स्थितोऽस्ति। अस्य विद्यालयस्य प्राचार्या सिस्टर सरिताऽस्ति। विद्यालयस्य भवनं मनोहरमस्ति। अत्र एकम् उद्यानमपि अस्ति। उद्याने विविधानि पुष्पाणि सन्ति। अस्मिन् विद्यालये शिक्षण व्यवस्था सुदृढ़ा अस्ति। अस्मिन् विद्यालये द्वि-सहस्राणि छात्राः पठन्ति।

अस्माकं विद्यालये न केवलं कला, विज्ञान, वाणिज्य च विषयस्य अध्ययन-अध्यापनस्य व्यवस्था अस्ति अपितु संगणकः, चित्रकला, नैतिकशिक्षायाः अध्ययनस्य कृते उत्तमा व्यवस्था अस्ति। अस्मिन् विद्यालये शारीरिक-प्रशिक्षण, योग-प्रशिक्षण, संगीत-प्रशिक्षणश्च प्रतिदिनम् भवति। मम विद्यालये पुस्तकालयम् अपि अस्ति। वयं तत्र प्रतिदिनं गच्छामः पुस्तकानि पठामः च। विद्यालयें विशालक्रीड़ाक्षेत्रममि अस्ति। वयं तत्र प्रतिदिनं खेलामः। अस्माकं विद्यालयः नगरस्य एकः आदर्श विद्यालयः अस्ति। मे विद्यालयः मह्यम् अति प्रियः।

प्रश्नः- 145

## 3. उद्यानम्

मम् गृहस्य समीपे अस्ति एकमतीव शोभनम् उद्यानम्। उद्यानस्य हरीतिमां विलोक्य जनाः प्रमुदिताः भवन्ति। अत्र विविधाः वृक्षाः विविधानि पुष्पाणि विविधाः लताश्च सन्ति। वृक्षाः पर्णैः पुष्पैः च शोभन्ते। पर्णानां वर्णाः हरिताः पुष्पाणां च वर्णाः विविधाः। पक्वानि फलानि वृक्षाणां भूषणानि सन्ति। वृक्षाणां शाखाः फलानां भारेण नमन्ति। जनाः वृक्षाणां फलानि भक्षयन्ति। सर्वाः लताः वृक्षान् आश्रयन्ति। लतानां कुसुमानि श्वेतानि, फलानि, नीलानि, रक्तानि वा सन्ति। मालाकारः उद्यानस्य पुष्पाणि चित्वा मालां निर्मापयति। अहं प्रतिदिनं सायङ्काले तत्र भ्रमणाय गच्छामि। उद्यानस्य शुद्धवायुः मह्यं रोचते। अत्र बालकानां कृते क्रीडनाय क्रीडाक्षेत्रमपि अस्ति। उद्यानस्य वृक्षाणां छायासु जनाः विश्राम्यन्ति। वृक्षेपु खगाः कूजन्ति। प्रभाते तेषां कूजनं मनोहरं भवति। उद्यानस्य समीपे एव जलाशयः अस्ति। मालाकारः तस्मात् जलसेचनं करोति। उद्यानम् अस्माकं जीवने महत्वपूर्णम्। वस्तुतः उद्यानं मे अति प्रियम्।

प्रश्नः- 146

## 4. महाकवि कालिदासः

कालिदासः भारतस्य श्रेष्ठतमः कविः। सः न केवलं भारतस्य प्रत्युत् विश्वस्य श्रेष्ठतमः कविः। अतएव सः कविकुलगुरुरिति कथ्यते। तेन विरचिताः सप्त ग्रन्थाः अतीव प्रसिद्धाः। तेषु द्वे महाकाव्ये - रघुवंशम् कुमारसम्भवं च द्वे खण्डकाव्ये - ऋतुसंहारं मेघदूतं च वर्तते। त्रीणि नाटकानि - मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम्। एषु मेघदूतस्य शाकुन्तलस्य च प्रचारो विदेशेषु अपि अधिको वर्तते। विश्वस्य सर्वास्वपि प्रमुखासु भाषासु कालिदासस्य ग्रन्थानामनुवादाः लभ्यन्ते। कालिदासस्य नाटकानि अद्यापि न केवलं भारते प्रत्युत् विश्वस्य प्रसिद्धेपु नगरेपु अभिनीयते। कालिदासस्य जन्म कदा जातमिति न विदितम्। ख्रीष्टाब्दस्य चतुर्थशताब्द्यां सः जातः इति बहवो मन्यते। केचित् च तं विक्रमस्य प्रथमशताब्द्यां जातं स्वीकुर्वन्ति। परं तस्य निवासो मध्यप्रदेशे

(31)

उज्जनियन्यामभवत् इति निश्चितम्। उज्जयिन्यां प्रतिवर्ष कालिदासमहोत्सवो भवति। कालिदासस्य उपमाः अतीव प्रसिद्धाः। उक्तञ्च - उपमा कालिदासस्य इति। स भारतस्य अति मनोरमम् वर्णनम् अकरोत्। तेन तुल्यः कोऽपि कविः न यद्यावधि अजायत। अतएव उक्तम् - एकोऽपि जीयते हन्त कालिदासो न केनचित्।

प्रश्न:-147

## 5. विद्या-महिमा

## ( विद्याधनं सर्वधन-प्रधानम्/विद्या ददाति विनयम्/विद्या विहीनः पशुः/विद्या सर्वस्य भूषणम् )

कस्यापि विषयस्य सम्यग् ज्ञानं भवति सा विद्या कथ्यते। अतः विद्यया एव मनुष्यः सत्यं-असत्यं च जानाति। विद्या विनयं ददाति। पुरुषे विनयात् पात्रताम् आयाति। पात्रतया सः धनं प्राप्नोति, धनेन धर्मं, धर्मेण च सुखं लभते। एतेन कारणेन सुखस्य आधारः विद्या एव अस्ति।

विद्या धनं व्ययेकृते वृद्धिमायाति परन्तु संचये कृते क्षयमायाति। अतः विद्या अपूर्वं धनमस्ति। इदम् धनं चौरः हर्तुं न शक्नोति भ्राता विभाजयितुं न समर्थोऽस्ति। विद्यावान् पुरुषः सर्वत्र उच्चस्थानं प्राप्नोति। राजा केवलं स्वदेशे पूज्यते परन्तु विद्वान् सर्वत्र पूज्यते। विद्या अज्ञानस्य तिमिरं दूरीकरोति ज्ञानस्य प्रकाशं प्रसारयति च।

विद्या एव जगति मनुष्यस्य उन्नतिं करोति। विद्या एवं कीर्तिं धनं च ददाति। विद्या वस्तुतः कल्पलता इव विद्यते। विदेशगमने विद्या परमसहायिका भवति। यस्य समीपे विद्या नास्ति सः नेत्रयुक्तः अपि अन्धः एव। विद्या माता इव रक्षति पिता इव हिते नियुङ्क्ते।

प्रश्न:-148

## 6. सदाचारः

अस्माकं भारतीया संस्कृतिः आचार-प्रधाना अस्ति। आचारः द्विविधः भवति-दुराचारः सदाचारः च। सताम् आचारः सचादारः इत्युच्यते। सज्जनाः विद्वांसो च यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। ते सत्यं वदन्ति, मातुः पितुः गुरुजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति, तेषाम् आज्ञां पालयन्ति सत्कर्मणि प्रवृत्ता भवन्ति।

जनस्य समाजस्य राष्ट्रस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारस्याभ्यासो बाल्यकालादेव भवति। सदाचारेण बुद्धिः वर्धते नरः धार्मिकः, शिष्टो, विनीतो, बुद्धिमान् च भवति। संसारे सदाचारस्यैव महत्वं दृश्यते। ये सदाचारिणः भवन्ति, ते एव सर्वत्र आदरं लभन्ते। यस्मिन् देशे जनाः सदाचारिणो भवन्ति तस्यैव सर्वतः उन्नतिर्भवति। अतएव महर्षिभिः आचारः परमो धर्मः इत्युच्यते सदाचारी जनः परदारेषुमातृवत् परधनेषु लोष्ठवत्, सर्वभूतेषु च आत्मवत् पश्यति। सदाचारीजनस्य शीलम् एव परमं भूषणम् अस्ति।

प्रश्न:-149

## 7. सत्संगतिः

सतां संगतिः इति सत्संगतिः। मनुष्योऽनुकरणशीलश्च वर्तते। संगतिप्रभावस्त्वनिवार्य एव भवति। सतां संगेन तु पुनमर्यमनुष्यस्य सततमभ्युदयो भवति। उत्तरोत्तरं हि सः उन्नतिमेति। यथा काञ्चनसंसर्गान्मारकतीं द्युतिं धत्ते, पारस स्पर्शमवाप्याय: स्वर्णतां याति, एवं हि मानवोपि सत्संगत्योच्चपदम् लभते। सत्संगत्या तु पुनः मनुष्यः शुद्धिधीः, आचारवान् च भवति। सत्संगत्या मनुष्यस्य यशो वर्धते, मानोन्नतिर्जायते, पापं नश्यति, चित्तं हृष्यति। सत्संगतिरेवम् महती मनुष्यस्योपकर्त्री विद्यते। सत्संगप्रभावेनैव रत्नाकरो लुण्ढको महाकविर्वाल्मीकिरभूत्। सत्संगत्यैव सूरदासः, नन्ददासः रसखानोऽन्ये च बध्वो भाषाकवयः स्वपापवृत्तिं परित्यज्य भगवद्भक्ताः जाताः। सत्संगेनैव नरेन्द्रो नास्तिकः परमहंसो विवेकानन्दोऽभवत्। दुर्जनसंगान्मनुष्यस्य कुतोऽपि हितं न भवति। गुणसम्पन्नोऽपि दुर्जनो हानिकारो भवति। सत्संगः एवं मानवोन्नति हेतुः यशः सुखकारी वरणीयश्चास्ति।

प्रश्न:-150

## 8. अस्माकं देशः ( भारतदेशः )

अयम् अस्माकं भारतदेशः अस्ति। यत्र भरतनामकः राजा वसतिस्म। तस्य सम्बन्धात् अस्य नाम भारतम् इति। अस्य उत्तरस्यां दिशि हिमालयः पर्वतः दक्षिणस्याम् च हिन्दमहासागरः अस्ति। अत्र गंगा, यमुना, सरयू, गोदावरी प्रभृतयः देवनद्यः प्रवहन्ति, यासां जलेन भारतभूमिः शस्यशामला अस्ति। इयं वीर प्रसूता भूमि अस्ति। विविधातायाम् एकता भारतस्य विशेषता अस्ति। अस्माकं राष्ट्रध्वजः त्रिवर्णात्मकः। राष्ट्रिय वाक्यम् - सत्यमेव जायते नानृतम्।